प्रत्यये परतोऽङ्गकार्यदृष्ट्या धातूनामङ्गानां वा विभाजनम्

प्रत्यया उक्ताः। इमे सार्वधातुकार्धधातुकप्रत्ययाः धातुभ्यो भवन्ति। सर्वेषां धातूनां रूपसाधने तु आयुरेव क्षीणं स्यात्, अतो लाघवेन कार्यसिद्ध्यर्थं भगवता पाणिनिना धातूनां वर्गाः कृताः। तदनुसारेण मयापि वर्गेषु विभज्यात्राङ्गकार्याण्युच्यन्ते। एकस्मिन् प्रत्यये परत एकैकस्य वर्गस्य एकधातोः रूपं यथा भवति, तस्मिन् प्रत्यये परतः तस्य वर्गस्य सर्वेषां धातूनां रूपाणि तथैव भवन्ति, अपवादं विहाय। अयमेव पाणिनीयो लघुतमोपायः।

लट्, लोट्, लङ्, विधिलिङ्, इत्येतेषां लकाराणां ये प्रत्यया उक्ताः, तेषां सम्यगभ्यासं विधायैवात्र प्रवेष्टव्यम्। तत्र – **ति, सि, मि, त्, स्, अम्, तु, आनि, आव, आम, ऐ, आवहै, आमहै, शप्, इत्येते चतुर्दश प्रत्ययाः सार्वधातुकपितः। अन्ये सार्वधातुक-अपितः।**

इदानीमङ्गकार्यमुच्यते –

अत्रेदं ध्येयम् – पित् सार्वधातुकम् = अकित् आर्धधातुकम्।

अपित् सार्वधातुकम् = कित्, ङित् आर्धधातुकम्।

अतो यत् कार्यं पिति सार्वधातुके भवति, तदेव कार्यम् अकिति आर्धधातुके भवति। यत् कार्यं अपिति सार्वधातुके भवति, तदेव कार्यम् किति, ङिति चार्धधातुके भवति।

अङ्गकार्यदृष्ट्या अङ्गानां धातूनां वा दश विभागा भवन्ति –

१. अकारान्ताः – कथ, रच, गण, जिगमिष, जङ्गम्य इत्यादयः।

२. आकारान्ताः – पा, भा, मा, ला, वा, इत्यादयः।

३. इकारान्ता-ईकारान्ताः – चि, जि, नी, ली, भी, इत्यादयः।

४. उकारान्ता-ऊकारान्ताः – यु, रु, दु, द्रु, भू, लू, पू, इत्यादयः।

५. ऋकारान्ताः – कृ, वृ, हृ, मृ, धृ, इत्यादयः।

६. ॠकारान्ताः – पॄ, शॄ, जॄ, भॄ, वॄ, मॄ, कॄ, इत्यादयः।

७. लघु-इगुपधाः। तत्र इदुपधाः – लिख्, चित्, भिद्, छिद्, इत्यादयः। उदुपधाः – बुध्, शुध्, कुप्, युध्, इत्यादयः। ऋदुपधाः – कृष्, वृष्, नृत्, वृध्, क्रुध्, इत्यादयः।

८. अनुनासिकान्ताः – गम्, हन्, मन्, इत्यादयः।

९. सम्प्रसारणिनः – वच्यादयः, ग्रह्यादयश्च।

१०. अनिदितः – मन्थ्, अञ्च्, लुञ्च् इत्यादयः।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

१. अकारान्तमङ्गम्

अतो गुणे (६.१.९६) – अपदान्ताद् अकाराद् गुणे (=अ, ए इत्येतयोः) परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति। पच+अन्ति = पचन्ति। भव+अन्ति=भवन्ति। 'अकः सवर्णे दीर्घः' इत्यस्यापवादः। पच+ए=पचे। यज+ए=यजे। 'वृद्धिरेचि' इत्यस्यापवादः। इदं पररूपमार्धधातुके प्रत्यये न भवति। तत्र तु अतो लोप इति लोपो भवति।

अतो लोपः (६.४.४८) – अदन्तस्याङ्गस्य लोपो भवति, आर्धधातुके प्रत्यये परतः। चिकीर्ष+इ+ता–चिकीर्ष्+इ+ता=चिकीर्षिता। चिकीर्ष+इ+तुम्–चिकीर्ष्+इ+तुम्=चिकीर्षितुम्। चिकीर्ष+इ+अक–चिकीर्ष्+इ+ अक=चिकीर्षकः। चिकीर्ष+यक्+ते=चिकीर्ष्यते। कथ+णिच्–कथ्+इ=कथि। गण्+णिच्–गण्+इ=गणि। रच्+णिच्–रच्+इ=रचि। लोलूय्+इता–लोलूय्+इता=लोलूयिता। एवं पोपूयिता।

यस्य हलः (६.४.४९) – हल उत्तरस्य यशब्दस्य लोपो भवति, आर्धधातुके प्रत्यये परतः। बेभिद्य+इ+ता–बेभिद्+इता=बेभिदिता। एवं बेभिदितुम्। बेभिदितव्यम्। यस्येति संघातग्रहणमेतत्।

क्यस्य विभाषा (६.४.५०) – हल उत्तरस्य क्यस्य विभाषा लोपो भवत्यार्धधातुके। समिध्य+इता=समिध्यिता, समिधिता। दृषद्य+इता=दृषद्यिता, दृषदिता। समिध्य, दृषद्य, इति क्यच्प्रत्ययान्तौ।

अतो दीर्घो यञि (७.३.१०१) – अदन्तस्याङ्गस्य दीर्घो भवति यञादौ (वकारादौ, मकारादौ च) सार्वधातुके प्रत्यये परतः। पच्+शप्+मि–पच+मि=पचामि। पच्+शप्+वः–पच+वः=पचावः। पच्+शप्+मः–पच+मः=पचामः। मि वः मः वहे महे व म वहि महि इत्येते नव यञादयः। एषु अदन्तस्याङ्गस्य दीर्घो भवति।

यकारादौ किति, ङिति, आर्धधातुके –

अकृत्सार्वधातुकयोर्दीर्घः (७.४.२५) – कृद्भिन्ने, सार्वधातुकभिन्ने च किति, ङिति यकारे परतः, अजन्तस्याङ्गस्य दीर्घो भवति।

भृश	+	क्यङ्	+	ते	–	भृशायते।
सुख	+	क्यङ्	+	ते	–	सुखायते।
दुःख	+	क्यङ्	+	ते	–	दुःखायते।

❖❖

२. आकारान्तमङ्गम्+पित्सार्वधातुकम्

पित्सु सार्वधातुकेषु प्रत्ययेषु आकारान्तानाम् अङ्गानां किमप्यङ्गकार्यं न भवति। यथा –

जाज्या	+	ति	=	जाज्याति।	जाज्या	+	आव	=	जाज्याव।
क्रीणा	+	ति	=	क्रीणाति।	क्रीणा	+	आव	=	क्रीणाव।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

जहा	+ ति	=	जहाति।	जहा	+ आव	=	जहाव।
दरिद्रा	+ ति	=	दरिद्राति।	दरिद्रा	+ आव	=	दरिद्राव।
ददा	+ ति	=	ददाति।	ददा	+ आनि	=	ददानि।
दधा	+ ति	=	दधाति।	पा	+ अन	=	पानम्।
वावा	+ सि	=	वावासि।	दा	+ अनीय	=	दानीयम्।
जागा	+ मि	=	जागामि।	जागा	+ आम	=	जागाम।

आतो युक् चिण्कृतोः (७.३.३३) – आकारान्तस्याङ्गस्य युगागमो भवति, चिणि, ञिति णिति च कृति। दा+ण्वुल्–दा+युक्+अक=दायकः। धा – धायकः। पा – पायकः। दा+घञ्–दा+युक्+अ=दायः।

आकारान्तमङ्गम्+अपित्सार्वधातुकम्

अपित्सु सार्वधातुकेषु प्रत्ययेषु आकारान्ताम् अङ्गानाम् एवं कार्यं भवति –

१. उःप्रत्यये आकारान्तो धातुः –

उस्यपदान्तात् (६.१.९५) – अपदान्ताद् आकाराद् उसि परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति। अदा + उः – अद् + उः = अदुः। अया + उः – अय् + उः = अयुः।

२. ज्याधातुः – अपित्सु प्रत्ययेषु ज्याधातोः सम्प्रसारणं भवति।

हलादौ अपिति प्रत्यये परतः– जाज्या+तः – 'ग्रहिज्यावयिव्यधि० (६.१.१६)' इति सूत्रेण यकारस्य सम्प्रसारणे – जाज् इ आ+तः – 'सम्प्रसारणाच्च (६.१.१०६)' इति आकारास्य पूर्वरूपे जाजि+तः। अत्र 'इ' इति सम्प्रसारणम्, स च हलः परः। तेन 'हलः' इति सूत्रेणास्य सम्प्रसारणस्य दीर्घो भवति = जाजीतः।

ज्या+श्ना+ति – 'ग्रहिज्यावयिव्यधि०' इति सूत्रेण यकारस्य सम्प्रसारणे – ज्+इ+ना+ति – 'सम्प्रसारणाच्च' इति इकारास्य पूर्वरूपे जाजि+ना। अत्र 'इ' इति सम्प्रसारणम्, स च हलः परः। तेन 'हलः' इति सूत्रेणास्य सम्प्रसारणस्य दीर्घो भवति = जी+ना+ति। प्वादीनां ह्रस्वः इति ह्रस्वत्वे – जिनाति।

अजादौ अपिति प्रत्यये परतः – जाज्या+अति – 'ग्रहिज्यावयिव्यधि०' इति सूत्रेण यकारस्य सम्प्रसारणे – जाज् इ आ + अति – 'सम्प्रसारणाच्च' इति आकारास्य पूर्वरूपे जाजि+अति। अत्र 'इ' इति सम्प्रसारणम्, स च हलः परः। तेन 'हलः (६.४.२)' इति सूत्रेणास्य सम्प्रसारणस्य दीर्घे = जाजी+अति। 'एरनेकाचोऽसंयोगपूर्वस्य' इति इकारस्य स्थाने यणादेशे – जाज्यति।

३. घुसंज्ञकम् अभ्यस्तम् अङ्गम् – हलादौ अजादौ च अपिति प्रत्यये 'श्नाभ्यस्तयोरातः' इति सूत्रेण घुसंज्ञकानाम् अभ्यस्तानाम् आकारस्य लोपो भवति।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

हलादौ अपिति प्रत्यये परतः – ददा+तः – 'श्नाभ्यस्तयोरातः (६.४.११२)' इति सूत्रेण आकारस्य लोपे – दद्+तः – 'खरि च' इति दकारस्य चर्त्वे = दत्तः। एवं – दधा+तः – दध्+तः – 'दधस्तथोश्च' इति दकारस्य धकारे – धध्+तः – 'खरि च' इति धकारस्य चर्त्वे = धत्तः।

अजादौ अपिति प्रत्यये परतः – ददा+अति – 'श्नाभ्यस्तयोरातः' इति सूत्रेण आकारस्य लोपे – दद्+अति = ददति। एवं – दधा+अति – दध्+अति = दधति।

४. अघुसंज्ञकम् अभ्यस्तम् अङ्गम् –

हलादौ अपिति प्रत्यये – 'ई हल्यघोः (६.४.११३)' इति सूत्रेण अघुसंज्ञकस्य अभ्यस्तस्य आकारस्य स्थाने 'ई' भवति – वावा+तः – वावी+तः = वावीतः।

अजादौ अपिति प्रत्यये – 'श्नाभ्यस्तयोरातः' इति सूत्रेण अघुसंज्ञकस्य अभ्यस्तस्य आकारस्य लोपो भवति – वावा+अति = वावति।

५. श्नान्तम् अङ्गम् –

हलादौ अपिति प्रत्यये – 'ई हल्यघोः (६.४.११३)' इति सूत्रेण श्नान्तस्य अङ्गस्य आकारस्य स्थाने 'ई' भवति – क्रीणा+तः = क्रीणी+तः = क्रीणीतः।

अजादौ अपिति प्रत्यये – 'श्नाभ्यस्तयोरातः' इति सूत्रेण इति सूत्रेण श्नान्तस्य अङ्गस्य आकारस्य लोपो भवति – क्रीणा+अन्ति = क्रीणन्ति।

६. दरिद्राधातुः –

हलादौ अपिति प्रत्यये – 'इद् दरिद्रस्य (६.४.११४)' इति सूत्रेण दरिद्राधातोः आकारस्य स्थाने 'इ' भवति – दरिद्रा+तः = दरिद्रि+तः = दरिद्रितः।

अजादौ अपिति प्रत्यये – 'श्नाभ्यस्तयोरातः' इति सूत्रेण इति सूत्रेण दरिद्राधातोः आकारस्य लोपो भवति – दरिद्रा+अति = दरिद्रति।

७. ओहाक् त्यागे धातुः। द्वित्वे कृते जहा –

हलादौ अपिति प्रत्यये – '**जहातेश्च** (६.४.११६)' इति सूत्रेण जहा धातोः आकारस्य स्थाने विकल्पेन 'इ' 'ई' भवतः – जहा+तः = जहितः, जहीतः।

अजादौ अपिति प्रत्यये – '**श्नाभ्यस्तयोरातः**' इति सूत्रेण जहा इत्यस्य आकारस्य लोपो भवति – जह्+अति = जहति।

यकारादौ अपिति प्रत्यये – '**लोपो यि** (६.४.११८)' इति सूत्रेण जहा इत्यस्य आकारस्य लोपो भवति – जहा+यात् = जह्यात्। जह्याताम्। जह्युः।

हिप्रत्यये – हिप्रत्यये '**आ च हौ** (६.४.११७)' इति सूत्रेण जहाधातोः आकारस्य स्थाने विकल्पेन 'आ' 'इ' 'ई' भवन्ति – जहा+हि = जहाहि, जहिहि, जहीहि।

८. शेषधातवः – एषां किमपि न भवति। वा+तः = वातः। वा+अन्ति = वान्ति।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

आकारान्तमङ्गम्+कित्, ङित् आर्धधातुकम्

१. ज्याधातुः – कित्सु, ङित्सु आर्धधातुकेषु प्रत्ययेषु ज्याधातोः सम्प्रसारणं भवति। ज्या+क्त्वा – 'ग्रहिज्यावयिव्यधि० (६.१.१६)' इति सूत्रेण यकारस्य सम्प्रसारणे – जाज् इ आ+त्वा – 'सम्प्रसारणाच्च' इति आकारास्य पूर्वरूपे जि+त्वा। अत्र 'इ' इति सम्प्रसारणम्, स च हलः परः। तेन 'हलः' इति सूत्रेणास्य सम्प्रसारणस्य दीर्घो भवति = जीत्वा।

२. आकारान्तधातुः – अजादौ क्ङिति आर्धधातुके प्रत्यये –

आतो लोप इटि च (६.४.६४) – अजादौ क्ङिति आर्धधातुके परतः, इटि च परतः, आकारान्तस्याङ्गस्य लोपो भवति।

किति आर्धधातुकप्रत्यये –

पपा + अतुः – पप् + अतुः = पपतुः।

पपा + उः – पप् + अतुः = पपुः।

तस्था + अतुः – तस्थ् + अतुः = तस्थतुः।

तस्था + उः – तस्थ् + अतुः = तस्थुः।

गोदा + क – गोद् + अ = गोदः।

कम्बलदा + क – कम्बलद् + अ = कम्बलदः।

ङिति आर्धधातुकप्रत्यये–

प्रदा + अङ् – प्रद् + अ = प्रदा।

प्रधा + अङ् – प्रध् + अ = प्रधा।

इटि परतः –

पपा + इ + थ – पप् + इ + थ = पपिथ।

तस्था + इ + थ – तस्थ् + इ + थ = तस्थिथ।

३. दो अवखण्डने, षो अन्तकर्मणि, माङ् माने, ष्ठा गतिनिवृत्तौ, इत्येते धातवः, तकारादौ किति प्रत्यये –

द्यतिस्यतिमास्थामित् ति किति (७.४.४०) – दो अवखण्डने, षो अन्तकर्मणि, माङ् माने, ष्ठा गतिनिवृत्तौ, इत्येतेषामङ्गानामिकारादेशो भवति तकारादौ किति प्रत्यये परतः।

दो–दा + क्त – दि + त = दितः।

दो–दा + क्तवतु – दि + त = दितवान्।

दो–दा + क्त्वा – दि + त = दित्वा।

दो–दा + क्तिन् – दि + त = दितिः।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

एवं – सो–सा –सितः। सितवान्। सित्वा। सितिः। मा –मितः। मितवान्। मित्वा। मितिः। स्था–स्थितः। स्थितवान्। स्थित्वा। स्थितिः।

४. शा, छा धातू, तकारादौ किति प्रत्यये परतः –

शाच्छोरन्तरस्याम् (७.४.४१) – शा छा इत्येतयोरन्यतरस्यामिकारादेशो भवति तकारादौ किति।

शो–शा–शितः। शितवान्। शित्वा। शितिः। शातः। शातवान्। शात्वा। शातिः।

छो–छा–छितः। छितवान्। छित्वा। छितिः। छातः। छातवान्। छात्वा। छातिः।

५. धा धातुः, तकारादौ किति प्रत्यये परतः –

दधातेर्हिः (७.४.४२) – दधातेरङ्गस्य हि इत्ययमादेशो भवति तकारादौ किति प्रत्यये परतः।

धा–हितः। हितवान्। हित्वा। हितिः।

६. हा धातुः, क्त्वाप्रत्यये परतः –

जहातेश्च क्त्वि (७.४.४३) – जहातेरङ्गस्य हीत्यमादेशो भवति क्त्वाप्रत्यये परतः। धा + क्त्वा = हित्वा। हित्वा राज्यं वनं गतः। हित्वा गच्छसि। जहातेर्निर्देशाद् ओहाङ्धातोर्न भवति। हात्वा।

७. घुसंज्ञकधातवः, तकारादौ किति प्रत्यये परतः –

दो दद् घोः (७.४.४६) – दा इत्येतस्य घुसंज्ञकस्य दथ् इत्ययमादेशो भवति तकारादौ किति प्रत्यये परतः।

दा + क्त = दत्तः। दत्तवान्। दा + क्त्वा = दत्त्वा। दा + क्तिन् = दत्तिः।

दाप्, दैप्, इत्यनयोः घुसंज्ञा न भवति। अतः अनयोः दथ् आदेशो न भवति। अतस्तत्र – दातः, दातवान्, इति रूपं भवति।

८. दाधातुः, तकारादौ किति प्रत्यये परतः –

अच उपसर्गात् तः (७.४.४७) – अजन्तादुपसर्गादुत्तरस्य दा इत्येतस्य घुसंज्ञकस्य त इत्ययमादेशो भवति तकारादौ किति।

प्र+दा + क्त – प्रद्त् + त = प्रत्तम्।

अव+दा + क्त – अवद्त् + त = अवत्तम्।

नि+दा + क्त – निद्त् + त = नीत्तम्।

परि+दा + क्त – परिद्त् + त = परीत्तम्।

९. घुमास्थादय आकारान्तधातवः, हलादौ क्ङिति आर्धधातुके प्रत्यये परतः –

डुदाञ्=दा, दाण्=दा, देङ्=दा, दो=दा, डुधाञ्=धा, धे=धा, इत्येते दारूपा, धारूपाश्च षड् धातवो **'दाधाघ्वदाप्'** इति सूत्रेण घुसंज्ञका भवन्ति।

घुमास्थागापाजहातिसां हलि (६.४.६६) – घुसंज्ञकानामङ्गानां मा स्था गा पा जहाति सा

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

इत्येतेषां हलादौ क्ङिति आर्धधातुके प्रत्यये परत ईकारादेशो भवति।

दा	+ यक् +	ते	=	दीयते	धा	+	यक्	+	ते	=	धीयते
मा	+ यक् +	ते	=	मीयते	स्था	+	यक्	+	ते	=	स्थीयते
गा	+ यक् +	ते	=	गीयते	पा	+	यक्	+	ते	=	पीयते
हा	+ यक् +	ते	=	हीयते	सा	+	यक्	+	ते	=	सीयते
धेट्–धा	+ क्त		=	धीतः।	धेट्–धा	+	क्तवतु			=	धीतवान्।

पातेरिह ग्रहणं नास्ति, लुग्विकरणत्वात्। जहातेर्निर्देशाद् ओहाङ्धातोर्न भवति।

१०. घुमास्थादय आकारान्तधातवः, आशीर्लिङि परतः –

एर्लिङि (६.४.६७) – घुमास्थागापाजहातिसां धातूनाम् आशीर्लिङि परत एकारादेशो भवति।

दा	+	यात्	=	देयात्।	धा	+	यात्	=	धेयात्।
मा	+	यात्	=	मेयात्।	स्था	+	यात्	=	स्थेयात्।
गा	+	यात्	=	गेयात्।	पा	+	यात्	=	पेयात्।
हा	+	यात्	=	हेयात्।	सा	+	यात्	=	सेयात्।

११. संयोगादय आकारान्तधातवः, आशीर्लिङि परतः –

वान्यस्य संयोगादेः (६.४.६८) – घुमास्थादिभ्यो अन्यो यो धातुः संयोगादिः आकारान्तः, तस्य वा एकारादेशो भवति आशीर्लिङि परतः।

ग्ला	+	यात्	=	ग्लेयात्, ग्लायात्।	म्ला	+	यात्	=	म्लेयात्, म्लायात्।
घ्रा	+	यात्	=	घ्रेयात्, घ्रायात्।	प्रा	+	यात्	=	प्रेयात्, प्रायात्।

१२. घुमास्थादय आकारान्तधातवः, ल्यपि परतः –

न ल्यपि (६.४.६९) – ल्यपि प्रत्यये परतो घुमास्थागापाजहातिसां ईत्वं न भवति।

प्रदा+ल्यप्=प्रदाय। प्र+धा+ल्यप्=प्रधाय। प्रमा+ल्यप्=प्रमाय। प्रस्था+ल्यप्=प्रस्थाय। प्रगा+ल्यप्=प्रगाय। प्रपा+ल्यप्=प्रपाय। प्रहा+ल्यप्=प्रहाय। अवसा+ल्यप्=अवसाय॥

१३. मे–मा धातुः, ल्यपि परतः –

मयतेरिदन्यतरस्याम् (६.४.७०) – मयतेरिकारादेशो वा भवति ल्यपि परतः। अप+मा+ल्यप् = अपमित्य, अपमाय ॥

१४. घ्रा, ध्मा, धातू, यङि परतः –

ई घ्राध्मोः (७.४.३१) – घ्रा ध्मा इत्येतयोर्यङिपरत ईकारादेशो भवति। जेघ्रीयते। देध्मीयते॥

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

३. इकारान्तमङ्गम्

इकारान्तमङ्गम्+पित् सार्वधातुकम् / अकित् आर्धधातुकम्

सार्वधातुकार्धधातुकयोः (७.३.८४) – इगन्तस्य अङ्गस्य गुणो भवति, पिति सार्वधातुके, किद्-ङिद्-भिन्ने आर्धधातुके च प्रत्यये परतः। अनेन सूत्रेण पिति सार्वधातुके प्रत्यये परतः इकारस्य गुणो भवति।

बिभी	+	ति	= बिभेति।	बिभी	+	आनि	–	बिभे	+	आनि	= बिभयानि
बिभी	+	सि	= बिभेषि।	अबिभी	+	अम्	–	अबिभे	+	अम्	= अबिभयम्
जिह्री	+	ति	= जिह्रेति।	जिह्री	+	आनि	–	जिह्रे	+	आनि	= जिह्रयाणि
भी	+	तव्य	= भेतव्यम्।	चि	+	अनीयर्	–	चे	+	अनीय	= चयनीयम्।
क्री	+	तुम्	= क्रेतुम्।	चि	+	यत्	–	चे	+	यत्	= चेयम्।

अचो ञ्णिति (७.२.११६) – अजन्तस्याङ्गस्य वृद्धिर्भवति, ञिति णिति प्रत्यये । नी + ण्वुल् = नै + अक = नायकः। भू + ण्वुल् = भौ + अक = भावकः। कृ + ण्वुल् = कार् + अक = कारकः।

इकारान्तमङ्गम्+अपित् सार्वधातुकम् / कित् ङित् आर्धधातुकम्

हलादौ किति ङिति प्रत्यये –

क्ङिति च (१.१.५)– अपिति सार्वधातुके, किति, ङिति चार्धधातुके प्रत्यये परतः, इकः स्थाने गुणवृद्धी न भवतः। 'सार्वधातुकमपित्' इत्यनेनातिदेशेन अपित् सार्वधातुकप्रत्यया ङिद्वद् भवन्ति।

इ + तः = इतः। जेजि + तः = जेजितः। नेनी + तः = नेनीतः। वी + तः = वीतः। दी + श्यन् + ते = दीयते। मी + श्यन् + ते = मीयते। इ + तः = इतः। जि + तः = जितः। नी + तः = नीतः। वी + तः = वीतः। भी + तः = कृ + क्त्वा = कृत्वा। कृ + क्तिन् = कृतिः। प्री + यक् + ते = प्रीयते।

भियोऽन्यतरस्याम् (६.४.११५)– हलादौ अपिति प्रत्यये परतः भी धातोः इकारस्य स्थाने वा 'इ' इत्यादेशो भवति। बिभी + तः = बिभीतः / बिभितः। बिभी + थः = बिभीथः / बिभिथः। बिभी + वः = बिभीवः / बिभिवः। बिभी + मः = बिभीमः / बिभिमः।

यकारादौ किति ङिति प्रत्यये –

अकृत्सार्वधातुकयोर्दीर्घः (७.४.२५)– कृद्भिन्ने, सार्वधातुकभिन्ने च किति, ङिति यकारे परतः, अजन्तस्याङ्गस्य दीर्घो भवति।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

चि + यक् + ते – चीयते।

चि + यङ् + ते – चेचीयते।

चि + क्यङ् + ते – चीयात्।

अजादौ किति ङिति प्रत्यये –

अजादौ अपिति प्रत्यये परतः 'क्ङिति च' इति सूत्रेण इगन्तस्याङ्गस्य गुणनिषेधे सति कस्य इकारस्य किं भवति इति विभज्योच्यते –

१. इण्धातुः – 'इणो यण् (६.४.८१)' इति सूत्रेण एकाच्–इकारान्त–धातूनां मध्ये इण्धातोः यण् भवति, अजादौ अपिति प्रत्यये। इ + अन्ति – य् + अन्ति = यन्ति। इ + अन्तु – य् + अन्तु = यन्तु। आ + इ + अन् – आ + य् + अन् = आयन्। ई इ + अतुः – ई य् + अतुः – ईयतुः।

२. इण्भिन्न–एकाच्–इकारान्त–धातुः – एकाच्–इकारान्त–धातूनां मध्ये इण्भिन्न–एकाच्–इकारान्त–धातूनाम् अजादौ अपिति प्रत्यये 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७)' इति सूत्रेण इयङ् भवति – वी+अन्ति – इयङादेशे – वियि् + अन्ति = वियन्ति। प्री + क – प्री + अ – इयङादेशे – प्रियि् + अ = प्रियः।

३. संयोगपूर्व–अनेकाच्–इकारान्त–धातुः – अजादौ अपिति प्रत्यये 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७)' इति सूत्रेण संयोगपूर्व–अनेकाच्–इकारान्त–धातूनाम् इकारस्य स्थाने इयङ् आदेशो भवति – जिह्री+अति – इयङादेशे – जिह्रियि् + अति = जिह्रियति। जिह्री+अतुः – इयङादेशे – जिह्रियि् + अतुः = जिह्रियतुः।

४. असंयोगपूर्व–अनेकाच्–इकारान्त–धातुः – अजादौ अपिति प्रत्यये 'एरनेकाचो–संयोगपूर्वस्य (६.४.८२)' इति सूत्रेण असंयोगपूर्व–अनेकाच्–इकारान्त–धातूनाम् इकारस्य स्थाने यणादेशो भवति – बिभी+अति – यणादेशे – बिभ्यि् + अति = बिभ्यति। दीधी+आते – दीध्यि्+आते = दीध्याते। वेवी+आते – वेव्यि्+आते = वेव्याते। निनी+अतुः – यणादेशे – निन्यि् + अतुः = निन्यतुः। आदीधी+अनम् – आदीध्यि्+अनम् = आदीध्यनम्। एवं आवेव्यनम्।

५. दीधी–वेवी–धातू – ईकारे परे, यकारे च परे '**यीवर्णयोर्दीधीवेव्योः** (७.४.५३)' इति सूत्रेण दीधी–वेवी–धात्वोः ईकारस्य लोपो भवति। दीधी+ईत – दीध्+ईत – दीधीत। वेवी+ईत – वेव्+ईत = वेवीत। आदीधी+ल्यप् – आदीध्+य = आदीध्य। आवेवी+ल्यप् = आवेव्य।

६. जुसि प्रत्यये परतः – यद्यपि जुस् इत्यजादिः अपित् प्रत्ययः अस्ति, किन्तु 'जुसि च' इति विशेषसूत्रेण जुसि परतः इगन्तस्याङ्गस्य गुणो भवति।

अबिभी+उः = अबिभे+उः – अबिभय्+उः = अबिभयुः।

७. शीङ् धातुः – '**शीङः सार्वधातुके गुणः** (७.४.२१)' इत्यनेन सूत्रेण पिति, अपिति हलादौ, अजादौ च सार्वधातुके प्रत्यये परतः शीङ्धातोः गुणो भवति।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

शी+ते = शेते। शी + रते = शेरते। शी+आते – शे+आते – शय्+आते = शयाते। शी+ऐ – शय्+ऐ = शयै।

८. अयङ् यि क्ङिति (७.४.२२)–

शीङोऽङ्गस्य यकारादौ क्ङिति प्रत्यये परतः अयङ् इत्ययमादेशो भवति।

शी	+	यक्	+	ते	=	शय्यते।
प्र+शी	+	ल्यप्			=	प्रशय्य।

९. णिजन्तधातूनाम् इकारः –

णेरनिटि(६.४.५१)– अनिडादौ आर्धधातुके प्रत्यये परतः णेर्लोपो भवति। कारि+अक=कारकः। हारकः। कारि+यक्+ते=कार्यते। हार्यते। कारि+अन=कारणा।

निष्ठायां सेटि (६.४.५२) – सेटि निष्ठायां परतो णेर्लोपो भवति। कारि+इ+क्त=कारितम्। हारितम्। गणितम्। लक्षितम्।

ल्यपि लघुपूर्वात् (६.४.५६) – ल्यपि परतो लघुपूर्वाद् वर्णाद् उत्तरस्य णेः अयादेशो भवति।

प्रणमि+ल्यप्=प्रणमय्य। विरचि+ल्यप्=विरचय्य। प्रतमि+ल्यप्=प्रतमय्य। प्रदमि+ल्यप्=प्रदमय्य। प्रशमि+ल्यप्=प्रशमय्य, संदमय्य गतः। विगणि+ल्यप्=विगणय्य गतः। प्रबेभिद्य+णिच्+ल्यप्–अतो लोपः इत्यल्लोपे, यस्य हलः इति यलोपे – प्रबेभिद्+इ+य=प्रबेभिदय्य गतः।

लघुपूर्वादिति किम् ? प्रपाति – प्रपात्य गतः॥

विभाषापः (६.४.५७) – आप उत्तरस्य णेर्ल्यपि परतो विभाषायादेशो भवति। प्रापय्य गतः, प्राप्य गतः।

❖❖

४. उकारान्तमङ्गम्

उकारान्तमङ्गम्+पित् सार्वधातुकम् / अकित् आर्धधातुकम्

सार्वधातुकार्धधातुकयोः (७.३.८४)– इगन्तस्य अङ्गस्य गुणो भवति, पिति सार्वधातुके, किद्–ङिद्–भिन्ने आर्धधातुके च प्रत्यये परतः। अनेन सूत्रेण पिति सार्वधातुके प्रत्यये परतः उकारस्य गुणो भवति –

हु	+	तव्य	=होतव्यम्।	हु	+	अनीयर्	–	हो–हव्	+	अनीय	=	हवनीयम्
धू	+	ता	= धोता।	पू	+	अन	–	पो–पव्	+	अन	=	पवनः
द्रु	+	ता	= द्रोता।	रु	+	अप्	–	रो–रव्	+	अ	=	रवः
स्रु	+	ता	= स्रोता।	यु	+	अप्	–	यो–यव्	+	अ	=	यवः
जुहु	+	ति	= जुहोति।	जुहु	+	आनि	–	जुहो–जुहव्	+	आनि	=	जुहवानि।

अत्र विशेषाः – उतो वृद्धिर्लुकि हलि (७.३.८९) – शपो लुकि सति उकारान्तस्य धातोः

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

वृद्धिर्भवति, हलादौ पिति सार्वधातुके प्रत्यये परतः। यु+ति – अनेन सूत्रेण वृद्धौ = यौति। यु+सि = यौषि। यु+मि = यौमि। यु+तु = यौतु। अयु+त् = अयौत्। अयु+स् = अयौः।

ऊर्णोतेर्विभाषा (७.३.९०) – ऊर्णुधातोः वा वृद्धिर्भवति, हलादौ पिति सार्वधातुके प्रत्यये परतः। ऊर्णु+ति = ऊर्णोति, ऊर्णौति। ऊर्णु+सि = ऊर्णोषि, ऊर्णौषि। ऊर्णु+मि = ऊर्णोमि, ऊर्णौमि। ऊर्णु+तु = ऊर्णोतु, ऊर्णौतु।

गुणोऽपृक्ते(७.३.९१) – ऊर्णुधातोः वा वृद्धिर्भवति, अपृक्ते प्रत्यये परतः, पक्षे गुणो भवति। आ+ऊर्णु+त् = और्णोत्। आ+ऊर्णु+स् = और्णोः।

अचो ञ्णिति (७.२.११६) – अजन्तस्याङ्गस्य वृद्धिर्भवति, ञिति णिति प्रत्यये । नी + ण्वुल् = नै + अक = नायकः। भू + ण्वुल् = भौ + अक = भावकः। कृ + ण्वुल् = कार् + अक = कारकः।

उकारान्तमङ्गम्+अपित् सार्वधातुकम् / कित्-ङित्-आर्धधातुकम्

हलादौ किति ङिति प्रत्यये –

क्ङिति च (१.१.५)– अपिति सार्वधातुके, किति, ङिति च आर्धधातुके प्रत्यये परतः, इकः स्थाने गुणवृद्धी न भवतः। 'सार्वधातुकमपित्' इत्यनेनातिदेशेन अपित् सार्वधातुकप्रत्यया ङिद्वद् भवन्ति।

बोभू + तः = बोभूतः। योयु + तः = योयुतः। लोलू + तः = लोलूतः। नु + क्तः = नुतः। यु + क्त्वा = युत्वा। दू+ श्यन् +ते = दूयते। भू + तः = भूतः। यु + तः = युतः। नु + तः = नुतः। भू + क्त्वा = भूत्वा। यु + त्वा = युत्वा। नु + त्वा = नुत्वा। नु + क्तवतु = नुतवान्।

यकारादौ किति ङिति प्रत्यये –

अकृत्सार्वधातुकयोर्दीर्घः (७.४.२५) –

कृद्भिन्ने, सार्वधातुकभिन्ने च किति, ङिति यकारे परतः, अजन्तस्याङ्गस्य दीर्घो भवति।

स्तु	+	क्यङ्	+	ते	–	स्तूयते।
स्तु	+	यङ्	+	ते	–	तोष्टूयते।
स्तु	+	यात्	+	ते	–	स्तूयात्।

अजादौ किति ङिति प्रत्यये –

१. हु (जुहु) धातुः – अजादौ अपिति सार्वधातुके प्रत्यये परतः **'हुश्नुवोः सार्वधातुके** (६.४.८७)' इति सूत्रेण हुधातोः यण् भवति – जुहु + अति – जुह्व् + अति = जुह्वति।

२. असंयोगपूर्वं श्नुप्रत्ययान्तम् अङ्गम् – अजादौ अपिति सार्वधातुके प्रत्यये परतः असंयोगपूर्वस्य श्नुप्रत्ययान्तस्य अङ्गस्य 'हुश्नुवोः सार्वधातुके (६.४.८७)' इति सूत्रेण यण् भवति। चिनु + अन्ति = चिन्वन्ति। चिनु + आते = चिन्वाते।

३. संयोगपूर्वं श्नुप्रत्ययान्तम् अङ्गम् – अजादौ अपिति सार्वधातुके प्रत्यये परतः संयोगपूर्वस्य

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

श्नुप्रत्ययान्तस्य अङ्गस्य 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण उकारस्य स्थाने उवङ् आदेशो भवति – शक्नु + अन्ति = शक्नुवन्ति। अश्नु + आते = अश्नुवाते।

४. उप्रत्ययान्तम् अङ्गम् – अजादौ अपिति सार्वधातुके प्रत्यये परतः 'इको यणचि' इति सूत्रेण उप्रत्ययान्तस्य अङ्गस्य यण् भवति – तनु + अन्ति = तन्वन्ति। तनु + आते = तन्वाते।

५. शेष-उकारान्तधातवः – अजादौ अपिति सार्वधातुके प्रत्यये परतः अन्येषाम् उकारान्त-धातूनाम् 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण उकारस्य स्थाने उवङ् आदेशो भवति – बोभू + अति = बोभुवति। गु + श +ति = गुवति। ध्रु + श +ति = ध्रुवति। नु + श +ति = नुवति।

६. जुसि प्रत्यये परतः – यद्यपि जुस् इत्यजादिः अपित् प्रत्ययः अस्ति, किन्तु 'जुसि च' इति विशेषसूत्रेण जुसि परतः इगन्तस्याङ्गस्य गुणो भवति। अजुहु+उः = अजुहो+उः = अजुहवुः।

७. उप्रत्ययान्तमङ्गं हि प्रत्यये –

उतश्च प्रत्ययादसंयोगपूर्वात् (६.४.१०६) – असंयोगपूर्वाद् उकारान्तात् प्रत्ययात् परतः हिप्रत्ययस्य लोपो भवति। चिनु+हि = चिनु। तनु+हि = तनु।

❖❖❖

५. ऋकारान्तमङ्गम्

ऋकारान्तमङ्गम्+पित् सार्वधातुकम् / अकित् आर्धधातुकम्

सार्वधातुकार्धधातुकयोः (७.३.८४)– इगन्तस्य अङ्गस्य गुणो भवति, पिति सार्वधातुके, किद्-ङिद्-भिन्ने आर्धधातुके च प्रत्यये परतः। अनेन सूत्रेण पिति सार्वधातुके प्रत्यये परतः ऋकारस्य गुणो भवति – बिभृ + ति = बिभर्ति। बिभृ + आनि – बिभर् + आनि – बिभराणि।

कृ	+	तव्य	=	कर्तव्यम्।	कृ	+	अनीयर्	–	कर्	+	अनीय	=	करणीयम्
कृ	+	ता	=	कर्ता।	कृ	+	तुम्	–	कर्	+	तुम्	=	कर्तुम्
हृ	+	तव्य	=	हर्तव्यम्।	हृ	+	अनीयर्	–	हर्	+	अनीय	=	हरणीयम्

अचो ञ्णिति (७.२.११५) – अजन्तस्याङ्गस्य वृद्धिर्भवति, ञिति णिति प्रत्यये ।नी + ण्वुल् = नै + अक = नायकः। भू + ण्वुल् = भौ + अक = भावकः। कृ + ण्वुल् = कार् + अक = कारकः।

ऋकारान्तमङ्गम्+अपित् सार्वधातुकम् / कित्-ङित्-आर्धधातुकम्

ऋकारान्तस्याङ्गस्य हलादौ किति ङिति प्रत्यये सामान्यम् –

ऋकारान्तस्य अङ्गस्य 'क्ङिति च (१.१.५)' इति सूत्रेण गुणनिषेधो भवति।

कृ	+	तः	=	कृतः।	हृ	+	तः	=	हृतः।
बिभृ	+	तः	=	बिभृतः।	बिभृ	+	थः	=	बिभृथः।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

बिभृ + वः = बिभृवः। जागृ + तः = जागृतः।

जागृ + वः = जागृवः। जागृ + मः = जागृवः।

भृ + तः = भृतः। हृ + क्त्वा = हृत्वा। भृ + क्तिन् = भृतिः। कृ + क्तवतु = कृतवान्। कृ+क्तिन् = कृतिः। स्मृ +क्तिन् = स्मृतिः। मृ+तः = मृतः। धृ+क्तवतु = धृतवान्।

ऋकारान्तस्याङ्गस्य अजादौ किति ङिति प्रत्यये सामान्यम् –

अजादौ किति ङिति प्रत्यये ऋकारान्तानाम् अङ्गानाम् 'इको यणचि (६.१.७६)' इति सूत्रेण यण् भवति – बिभृ + अति – बिभ्र् + अति = बिभ्रति। जागृ + अति – जाग्र् + अति = जाग्रति। बभृ+अतुः – बभ्र्+अतुः = बभ्रतुः। बभृ+उः – बभ्र्+उः = बभ्रुः। एवं – चकृ+अतुः – चक्र्+अतुः = चक्रतुः। चकृ+उः – चक्र्+उः = चक्रुः।

ऋकारान्तस्याङ्गस्य किति ङिति विशेषः –

१. जुसि प्रत्यये परतः इगन्तस्याङ्गस्य –'जुसि च (७.३.८३)'इति गुणो भवति। अबिभृ+उः = अबिभर्+उः = अबिभरुः। यद्यपि जुस् इत्यजादिः अपित् प्रत्ययः अस्ति, किन्तु 'जुसि च' इति सूत्रबलाद् जुसि गुणो भवति।

२. ऋदृशोऽङि गुणः (७.४.१६) – ऋवर्णान्तानां दृशेश्चाङि परतो गुणो भवति। शकलाङ्गुष्ठकोऽकरत् (अकृ+अङ्+त्–गुणे =अकरत्)। अहं तेभ्योऽकरं नमः (अकृ+अङ्+अम्–गुणे=अकरम्)। असरत् (असृ+अङ्+त्–गुणे=असरत्)। आरत् (आ+ऋ+अत्–गुणे=आरत्)। जरा (अजॄ+अङ्+टाप्–गुणे=जरा)।(अदृश् +अङ्+त्–गुणे=अदर्शत्)।

३. ऋतश्च संयोगादेर्गुणः (७.४.१०)– संयोगादेः ऋकारान्तस्याङ्गस्य गुणो भवति लिटि परतः। सस्वृ +अतुः=सस्वरतुः। सस्वृ +उः=सस्वरुः। दध्वृ+अतुः=दध्वरतुः। दध्वृ+उः=दध्वरुः। सस्मृ+अतुः=सस्मरतुः। सस्मृ+उः=सस्मरुः।

४. ऋच्छत्यृताम् (७.४.११)– ऋच्छतेरङ्गस्य, ऋ इत्येतस्य धातोः, ऋकारान्तानां च लिटि परतो गुणो भवति।

आऋ + अतुः = आरतुः। आऋ + उः = आरुः। आनृच्छ् + अतुः = आनर्च्छतुः। आनृच्छ् + उः = आनर्च्छुः।

कृद्भिन्ने, सार्वधातुकभिन्ने च यकारे परतः –

५. रीङ् ऋतः (७.४.२७)– ऋकारस्य स्थाने रीङ् इत्ययमादेशो भवति, कृद्भिन्ने, सार्वधातुकभिन्ने यकारे, च्वौ च परतः।

मातृ + क्यच् – मात्रीय = मात्रीयति। पितृ + क्यच् – पित्रीय = पित्रीयति।

मातृ + क्यङ् – मात्रीय = मात्रीयते। मातृ + च्वि – मात्री = मात्रीभूतः।

कृ + यङ् = चेक्रीयते। हृ + यङ् – जेह्रीय = जेह्रीयते।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

६. जाग्रोऽविचिण्णल्ङित्सु (७.३.८५) – जागृधातोः गुणो भवति, वि–चिण्–णल्–ङिद्भिन्ने सार्वधातुके, आर्धधातुके च प्रत्यये परतः। जागृ + यक् + ते – गुणे – जागर्यते। जागृ + यात् – गुणे – जागर्यात्।

७. गुणोऽर्तिसंयोगाद्योः (७.४.२९) – ऋधातोः, संयोगादीनामृकारान्तानां च धातूनां गुणो भवति, यकि, यकारादौ आशीर्लिङि च परतः।

यकि – ऋ + यक् + ते – गुणे – अर् + य + ते = अर्यते। एवं – स्मृ + यक् + ते = स्मर्यते। ध्वृ + यक् + ते = ध्वर्यते।

यकारादौ आशीर्लिङि – ऋ + यात् – गुणे – अर् + यात् = अर्यात्। एवं – स्मृ + यात् = स्मर्यात्। ध्वृ + यात् = ध्वर्यात्। ह्वृ + यात् = ह्वर्यात्।

८. रिङ्शयग्लिङ्क्षु (७.४.२८) – जागृ–ऋ–संयोगपूर्वऋकारान्तभिन्नानां ऋकारान्तानां धातूनां रिङ् इत्ययमादेशो भवति, शे, यकि, यकारादौ आशीर्लिङि च परतः।

शे – धृ + श + ते – रिङादेशे – ध्रि + अ + ते – 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण इयङादेशे – ध्रिय् + अ + ते = ध्रियते। एवं – दृ + श + ते = द्रियते। मृ + श + ते = म्रियते।

यकि – धृ + यक् + ते – रिङादेशे – ध्रि + य + ते = ध्रियते। एवं – दृ + यक् + ते = द्रियते। मृ + यक् + ते = म्रियते।

यकारादौ आशीर्लिङि – धृ + यात् – रिङादेशे – ध्रि + यात् = ध्रियात्। एवं – दृ + यात् = द्रियात्। मृ + यात् = म्रियात्। कृ + यात् = क्रियात्।

९. यङि च (७.४.३०) – ऋधातोः, संयोगपूर्वऋकारान्तानां च धातूनां गुणो भवति, यङि परतः। ऋ + यङ् + ते – गुणे = अरार्यते। एवं – स्मृ + यङ् + ते = सास्मर्यते। ध्वृ + यङ् + ते = दाध्वर्यते।

ॠकारान्ता धातवः ॠकारान्तप्रसङ्गे वक्ष्यन्ते।

६. ॠकारान्तमङ्गम्

ॠकारान्तमङ्गम्+पित् सार्वधातुकम् / अकित् आर्धधातुकम्

सार्वधातुकार्धधातुकयोः (७.३.८४) – इगन्तस्य अङ्गस्य गुणो भवति, पिति सार्वधातुके, किद्–ङिद्–भिन्ने आर्धधातुके च प्रत्यये परतः। अनेन सूत्रेण पिति सार्वधातुके प्रत्यये परतः ॠकारस्य गुणो भवति –

तातॄ + ति = तातर्ति। तातॄ + आनि – तातर् + आनि – तातराणि। तॄ + शप् + ति – तर् + अति = तरति। तॄ + अन – तर् + अन – तरणम्। कॄ + अनीयर् – कर् + अनीय – करणीयम्।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

ऋकारान्तमङ्गम्+अपित् सार्वधातुकम् / कित्-ङित्-आर्धधातुकम्

ऋकारान्तमङ्गं द्विविधं भवति –

१. यत्र ऋकारात् पूर्वं ओष्ठ्यवर्णो भवति। यथा – पॄ वॄ मॄ भॄ।

ऋकारान्तमङ्गम् अजादौ किति ङिति प्रत्यये –

यत्र ऋकारात् पूर्वं ओष्ठ्यवर्णो भवति तत्र '**उदोष्ठ्यपूर्वस्य** (७.१.१०२)' इति सूत्रेण ओष्ठ्यपूर्वस्य ऋकारस्य स्थाने 'उर्' इत्यादेशो भवति, किति, ङिति प्रत्यये।

पापॄ +अति = पापुर् +अति = पापुरति। वावॄ +अति = वावुर् +अति = वावुरति। बाभॄ +अति = बाभुर् +अति = बाभुरति। मामॄ +अति = मामुर् +अति = मामुरति।

ऋकारान्तमङ्गं हलादौ किति ङिति प्रत्यये –

यत्र ऋकारात् पूर्वं ओष्ठ्यवर्णो भवति तत्र किति, ङिति प्रत्यये। 'उदोष्ठ्यपूर्वस्य (७.१.१०२)' इति सूत्रेण ओष्ठ्यपूर्वस्य ऋकारस्य स्थाने 'उर्' इत्यादेशो भवति। अनन्तरं 'हलि च (८.२.७७)' इति सूत्रेण उकारस्य स्थाने दीर्घो भवति। पापॄ +तः = पापुर् + तः = पापूर्तः। पापॄ +थः = पापुर् + तः = पापूर्थः। पापॄ +वः = पापुर् + वः = पापूर्वः। पापॄ +मः = पापुर् + मः = पापूर्मः। एवं – वावॄ +तः = वावूर्तः। बाभॄ +तः = बाभूर्तः। मामॄ +तः = मामूर्तः। भॄ+क्त्वा = भुर्+क्त्वा = भूर्त्वा। वॄ+क्त्वा= वुर्+त्वा = वूर्त्वा। पॄ+क्त्वा = पुर्+त्वा = पूर्त्वा। मॄ+क्त्वा = मुर्+त्वा = मूर्त्वा।

२. यत्र ऋकारात् पूर्वं ओष्ठ्यवर्णो न भवति। यथा – शॄ जॄ कॄ तॄ गॄ।

ऋकारान्तमङ्गम् अजादौ किति ङिति प्रत्यये –

यत्र ऋकारात् पूर्वं ओष्ठ्यवर्णो न भवति तत्र 'ऋत इद् धातोः (७.१.१००)' इति सूत्रेण अनोष्ठ्यपूर्वस्य ऋकारस्य स्थाने 'इर्' इत्यादेशो भवति, किति, ङिति प्रत्यये। तातॄ +अति = तातिर् +अति = तातिरति। शाशॄ +अति = शाशिरति। जाजॄ +अति = जाजिरति। चाकॄ +अति = चाकिरति। कॄ + क – किर् +अ = किरः।

ऋकारान्तमङ्गं हलादौ किति ङिति प्रत्यये –

यत्र ऋकारात् पूर्वं ओष्ठ्यवर्णो न भवति तत्र 'ऋत इद् धातोः (७.१.१००)' इति सूत्रेण अनोष्ठ्यपूर्वस्य ऋकारस्य स्थाने 'इर्' इत्यादेशो भवति, किति, ङिति प्रत्यये। अनन्तरं 'हलि च (८.२.७७)' इति सूत्रेण इकारस्य स्थाने दीर्घो भवति। तातॄ +तः = तातीर् +तः = तातीर्तः। तातॄ +मः = तातीर् +मः = तातीर्मः। शाशॄ +थः = शाशीर् +थः = शाशीर्थः। शाशॄ +मः = शाशीर् +मः = शाशीर्मः। जाजॄ +थः = जाजीर् +थः = जाजीर्थः। जाजॄ +मः = जाजीर् +मः = जाजीर्मः। चाकॄ + तः = चाकीर्तः। चाकॄ + वः = चाकीर्वः। चाकॄ + मः = चाकीर्मः।

शॄ + क्त्वा = शिर् + क्त्वा = शीर्त्वा। जॄ + क्त्वा = जिर् + त्वा = जीर्त्वा। तॄ + क्त्वा =

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

तिर् + त्वा = तीर्त्वा। गॄ + क्त्वा = गिर् + त्वा = गीर्त्वा।

ॠकारान्तमङ्गं जुसि प्रत्यये –

यद्यपि जुस् इत्यजादिः अपित् प्रत्ययः अस्ति, किन्तु 'जुसि च' इति विशेषसूत्रेण जुसि परतः इगन्तस्याङ्गस्य गुणो भवति। अतातॄ + उः = अतातर् + उः = अतातरुः। अपिपॄ + उः = अपिपर् + उः = अपिपरुः।

ॠकारान्तमङ्गं लिटि प्रत्यये –

ऋच्छत्यॄताम् (७.४.११) – ऋच्छतेरङ्गस्य, ऋ इत्येतस्य धातोः, ॠकारान्तानां च लिटि परतो गुणो भवति। निचकॄ + अतुः = निचकरतुः। निचकॄ + उः = निचकरुः। निजगॄ + अतुः = निजगरतुः। निजगॄ + उः = निजगरुः। यद्यपि अतुः, उः, इत्यार्धधातुककित्प्रत्ययौ स्तः, किन्तु अनेन गुणो भवति।

शॄदॄप्रां ह्रस्वो वा (७.४.१२) – शॄ दॄ पॄ इत्येतषामङ्गानां लिटि परतो वा ह्रस्वो भवति।

यदा ह्रस्वो न भवति, तदा '**ऋच्छत्यॄताम्**' इति गुणो भवति – शशॄ + अतुः = शशरतुः। शशॄ + उः = शशरुः। ॠकारस्य ह्रस्वे सति– '**इको यणचि** ' इति सूत्रेण यण् भवति – शशॄ + अतुः – ह्रस्वे – शशृ + अतुः–'**इको यणचि** ' इति सूत्रेण यणादेशे – शशर् + अतुः = शश्रतुः। शशॄ + उः = शशरुः। एवं – ददॄ–विदद्रतुः, विदद्रुः। विददरतुः, विददरुः। पपॄ–पप्रतुः, पप्रुः। पपरतुः, पपरुः।

❖❖

७. लघु-इगुपधमङ्गम्+पित् सार्वधातुकम् / अकित् आर्धधातुकम्

येषामुपधायां लघुः इग् भवति, ते लघु-इगुपध-धातवः सन्ति। तत्र इदुपधाः – लिख्, चित्, भिद्, छिद्, इत्यादयः। उदुपधाः – बुध्, शुध्, कुप्, युध्, इत्यादयः। ऋदुपधाः – कृष्, वृष्, नृत्, वृध्, क्रुध्, इत्यादयः। एषां धातूनां कृत उच्यते –

पुगन्तलघूपधस्य च (७.३.८६)– उपधायाः लघोः इकः स्थाने गुणो भवति, पिति सार्वधातुके, किद्-ङिद्-भिन्ने आर्धधातुके च प्रत्यये परतः। अनेन सूत्रेण पिति सार्वधातुके प्रत्यये परतः –

उपधायाः लघोः इकारस्य स्थाने गुणः 'ए' भवति – नेनिज् + ति = नेनेक्ति। चित् + शप् + ति – चेत् + अति = चेतति। मिद् + शप् + ते – मेद् + अते = मेदते। भिद् + ता = भेत्ता।

उपधायाः लघोः उकारस्य स्थाने गुणः 'ओ' भवति – मोमुद् + ति = मोमोत्ति। नुद् + ता = नोत्ता। बुध् + शप् + ति – बोध् + अति = बोधति। लुठ् + शप् + ते – लोठ् + अते = लोठते।

उपधायाः लघोः इकारस्य स्थाने गुणः 'अर्' भवति – नरीनृत् + ति = नरीनर्ति। सृप् + ता = सर्प्ता। वृत् + शप् + ते – वर्त् + अ + ते = वर्तते। गृज् + शप् + ति – गर्ज् + अ + ति = गर्जति।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

अस्यापवादाः –

१. नाभ्यस्तस्याचि पिति सार्वधातुके (७.३.८७)– अजादौ पिति सार्वधातुके प्रत्यये परे अभ्यस्तस्याङ्गस्य उपधायाः लघोः इकः स्थाने गुणो न भवति,

नेनिज्+आनि = नेनिजानि। वेविष् +आनि = वेविषाणि। दिधिष् + आनि = दिधिषाणि।

बोबुध्+आनि = बोबुधानि। बोबुध् +आव = बोबुधाव। बोबुध् + आम = बोबुधाम।

नरीनृत्+आनि = नरीनृतानि। नरीनृत् +आव = नरीनृताव। नरीनृत् + आम = नरीनृताम।

२. मृजेर्वृद्धिः (७.२.११४)– मृजेः इको वृद्धिर्भवति। गुणापवादः।

मृज् +ति = मार्ष्टि। मृज्+मि = मार्ज्मि। मृज् + आनि = मार्जानि। मृज् +आव = मार्जाव। मृज् + आम = मार्जाम। मृज् +ता = मार्ष्टा। मृज् +तुम् = मार्ष्टुम्। मृज् +स्यति = मार्क्ष्यति।

३. ऊदुपधाया गोहः (६.४.८९) – गुह्धातोरुपधाया इत्यादेशो भवति अजादौ प्रत्यये।

गुह्+शप्+ति = गूहति। गुह्+इ+ता = गूहिता।

लघु-इगुपधमङ्गम्+अपित् सार्वधातुकम् / कित्-ङित्-आर्धधातुकम्

क्ङिति च (१.१.५)– किति, ङिति च प्रत्यये परतः, इकः स्थाने गुणवृद्धी न भवतः। 'सार्वधातुकमपित्' इत्यनेनातिदेशेन अपित् सार्वधातुकप्रत्यया ङिद्वद् भवन्ति, अतः अपित्प्रत्यये परतः, इकः स्थाने गुणवृद्धी न भवतः।

उपधायाः लघोः इकारस्य स्थाने गुणो न भवति – नेनिज् + तः = नेनिक्तः।

उपधायाः लघोः उकारस्य स्थाने गुणो न भवति – मोमुद् + तः = मोमुत्तः।

उपधायाः लघोः इकारस्य स्थाने गुणो न भवति – नरीनृत् + तः = नरीनृत्तः।

एवं – क्षिप् + श्यन् +ति = क्षिप्यति। पुष् + श्यन् +ति = पुष्यति। नृत् + श्यन् +ति = नृत्यति। तुद् + श +ति = तुदति। कुच् + श +ति = कुचति। मृष् + श्यन् +ति = मृष्यति।

अस्यापवादः –

मिदेर्गुणः (७.३.८२)– मिदेः इको गुणो भवति, शिति प्रत्यये परतः। मिद् + श्यन् + ति = मेद्यति।

ऋदृशोऽङि गुणः(७.४.१६)– ऋवर्णान्तानां दृशेश्चाङि परतो गुणो भवति। अदृश् +अङ्+त् – गुणे = अदर्शत्। अङ्प्रत्ययः अपित्त्वाद् ङिदस्ति। अनेन ङित्त्वेऽपि गुणः।

❖❖

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

८. अनुनासिकान्तम् अङ्गम्+अपित् सार्वधातुकम् / कित्-ङित्-आर्धधातुकम्

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति (६.४.३७)- एषाम् धातूना-मनुनासिकस्य लोपो भवति, झलादौ अपिति सार्वधातुके, झलादौ किति ङिति आर्धधातुके च प्रत्यये परतः।

गम्, रम्, नम्, यम्, मन्, हन्, इत्येते षड् धातवः अनुदात्तोपदेशाः सन्ति। वन् इति भौवादिकः। तन्, मन्, वन्, क्षण्, क्षिण्, घृण्, तृण्, ऋण्, इत्येते तनादयः। आहत्य पञ्चदशधातूनामनुनासिकस्य लोपो भवति, झलादौ किति ङिति च प्रत्यये परतः।

गम्	+	क्त	=	गतः।	गम्	+	क्त्वतु	=	गतवान्।
रम्	+	क्त	=	रतः।	रम्	+	क्त्वतु	=	रतवान्।
नम्	+	क्त	=	नतः।	नम्	+	क्त्वतु	=	नतवान्।
यम्	+	क्त	=	यतः।	यम्	+	क्त्वतु	=	यतवान्।
मन्	+	क्त	=	मतः।	मन्	+	क्त्वतु	=	मतवान्।
हन्	+	क्त	=	हतः।	हन्	+	क्त्वतु	=	हतवान्।
वन्	+	क्त	=	वतः।	वन्	+	क्त्वतु	=	वतवान्।
तन्	+	क्त	=	ततः।	तन्	+	क्त्वतु	=	ततवान्।
मन्	+	क्त	=	मतः।	मन्	+	क्त्वतु	=	मतवान्।
वन्	+	क्त	=	वतः।	वन्	+	क्त्वतु	=	वतवान्।
क्षण्	+	क्त	=	क्षतः।	क्षण्	+	क्त्वतु	=	क्षतवान्।
क्षिण्	+	क्त	=	क्षितः।	क्षिण्	+	क्त्वतु	=	क्षितवान्।
घृण्	+	क्त	=	घृतः।	घृण्	+	क्त्वतु	=	घृतवान्।
तृण्	+	क्त	=	तृतः।	तृण्	+	क्त्वतु	=	तृतवान्।
ऋण्	+	क्त	=	ऋतः।	ऋण्	+	क्त्वतु	=	ऋतवान्।
जङ्गम्	+	तः	=	जङ्गतः।	जङ्घन्	+	तः	=	जङ्घतः।
नन्नम्	+	थः	=	नन्नथः।	रंरम्	+	थः	=	रंरथः।

जनसनखनां सञ्झलोः (६.४.४२)- एषां त्रयाणां धातूनामनुनासिकस्य आत्त्वं भवति, झलादौ किति ङिति च प्रत्यये परतः।

जन्	+	क्त	=	जातः।	जन्	+	क्त्वतु	=	जातवान्।
सन्	+	क्त	=	सातः।	सन्	+	क्त्वतु	=	सातवान्।
खन्	+	क्त	=	खातः।	खन्	+	क्त्वतु	=	खातवान्।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

अनुनासिकस्य क्विझलोः क्ङिति (६.४.१५)- उपरि पञ्चदशानुनासिकान्तानां धातूनामनुनासिकलोप उक्तः। त्रयाणामनुनासिकान्तानां धातूनामनुनासिकस्य आत्वम् उक्तम्। इदानीं येऽनुनासिकान्तधातवः शिष्टाः, तेषामुपधाया दीर्घो भवति, क्वौ झलादौ च किति ङिति प्रत्यये परतः।

तम्	+	क्त	=	तान्तः।	तम्	+	क्तवतु	=	तान्तवान्।
दम्	+	क्त	=	दान्तः।	दम्	+	क्तवतु	=	तान्तवान्।
क्षम्	+	क्त	=	क्षान्तः।	क्षम्	+	क्तवतु	=	क्षान्तवान्।
कन्	+	क्त	=	कान्तः।	कन्	+	क्तवतु	=	कान्तवान्।

गमहनजनखनघसां लोपः क्ङित्यनङि (६.४.९८)- गम्, हन्, जन्, खन्, घस्,इत्येतेषामुपधाया लोपो भवति, अजादौ किति, ङिति प्रत्यये परतः।

जङ्गम्	+	अति	=	जङ्ग्मति।	जङ्घन्	+	अति	=	जङ्घ्नति
जञ्जन्	+	अति	=	जञ्ज्ञति।	चङ्खन्	+	अति	=	चङ्ख्नति
हन्	+	अन्ति	=	घ्नन्ति।	हन्	+	अन्तु	=	घ्नन्तु

घ्नन्ति इत्यत्र 'हो हन्तेर्ञ्णिन्नेषु' इति हकारस्य कुत्वे घकारो भवति।

घस्-भसोः कृते विशेषः -

लोके अजादौ किति, ङिति प्रत्यये परतः 'गमहनजनखनघसां लोपः क्ङित्यनङि (६.४.९८)' इति सूत्रेण घस्धातोरुपधाया लोपो भवति -जघस् + अति = जक्षति।

किन्तु वेदे अजादौ हलादौ च किति, ङिति प्रत्यये परतः 'घसिभसोर्हलि च (६.४.१००)' इति सूत्रेण घस्-भस्-धात्वोरुपधाया लोपो भवति -बभस् + तः = बब्धः। बभस् + अति = बप्सति।

❖❖❖

९. सम्प्रसारणिनः वच्यादयः, ग्रह्यादयश्च+अपित् सार्वधातुकम् / कित्-ङित्-आर्धधातुकम्

यद्यपि कोऽपि सार्वधातुकप्रत्ययः कित् नास्ति, तथाप्यत्र सम्प्रसारणप्रसङ्गे वच्यादयोऽप्युच्यन्ते।

वचिस्वपियजादीनां किति (६.१.१५)- वच्, स्वप्, यजादीनां सम्प्रसारणं भवति किति प्रत्यये परतः।

'इग्यणः सम्प्रसारणम्' इति सूत्रेण यणः स्थाने इक् सम्प्रसारणं भवति। यकारस्य स्थाने इकारः। वकारस्य स्थाने उकारः। ऋकारस्य स्थाने रेफः। लृकारस्य स्थाने लकारः।

वच्	+	यक्	+	ते	=	उच्यते	स्वप्	+	यक्	+	ते	=	सुप्यते
यज्	+	यक्	+	ते	=	इज्यते	वद्	+	यक्	+	ते	=	उद्यते
वह्	+	यक्	+	ते	=	उह्यते	वस्	+	यक्	+	ते	=	उष्यते

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

वप्	+	यक्	+	ते	=	उप्यते	वे	+	यक्	+	ते	=	ऊयते
ह्वे	+	यक्	+	ते	=	हूयते	व्ये	+	यक्	+	ते	=	वीयते
श्वि	+	यक्	+	ते	=	शूयते							

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च (६.१.१६)– ग्रह्यादीनां सम्प्रसारणं भवति, किति, ङिति च प्रत्यये परतः।

ग्रह्	+	यक्	+	ते	=	गृह्यते	ज्या	+	यक्	+	ते	=	जीयते
व्यध्	+	यक्	+	ते	=	विध्यते	वश्	+	यक्	+	ते	=	उश्यते
व्यच्	+	यक्	+	ते	=	विच्यते	व्रश्च्	+	यक्	+	ते	=	वृश्च्यते
प्रच्छ्	+	यक्	+	ते	=	पृच्छ्यते	भ्रस्ज्	+	यक्	+	ते	=	भृज्ज्यते

❖❖❖

१०. अनिदितो धातवः+अपित् सार्वधातुकम् / कित्-ङित्-आर्धधातुकम्

अनिदितां हल उपधायाः क्ङिति (६.४.२४)– अनिदिताम् अङ्गानां हलन्तानामुपधाया नकारस्य लोपो भवति, किति, ङिति च प्रत्यये परतः।

पाणिनीयधातुपाठे येषां हलन्तधातूनामुपधायां नकारः पठितः, ते अनिदितः। एषाम् अनिदितां धातूनामुपधाया नकारस्य लोपो भवति, किति, ङिति च प्रत्यये परतः। एते धातव उदाह्रियन्ते –

अञ्च्	+	यक्	+	ते	=	अच्यते	लुञ्च्	+	यक्	+	ते	=	लुच्यते
वञ्च्	+	यक्	+	ते	=	वच्यते	कुञ्च्	+	यक्	+	ते	=	कुच्यते
चञ्च्	+	यक्	+	ते	=	चच्यते	लुञ्च्	+	यक्	+	ते	=	लुच्यते
तञ्च्	+	यक्	+	ते	=	तच्यते	त्वञ्च्	+	यक्	+	ते	=	त्वच्यते
म्रुञ्च्	+	यक्	+	ते	=	म्रुच्यते	म्लुञ्च्	+	यक्	+	ते	=	म्लुच्यते
ग्लुञ्च्	+	यक्	+	ते	=	तच्यते	अञ्ज्	+	यक्	+	ते	=	अज्यते
रञ्ज्	+	यक्	+	ते	=	रज्यते	भञ्ज्	+	यक्	+	ते	=	भज्यते
सञ्ज्	+	यक्	+	ते	=	सज्यते	स्वञ्ज्	+	यक्	+	ते	=	स्वज्यते
मन्थ्	+	यक्	+	ते	=	मथ्यते	ग्रन्थ्	+	यक्	+	ते	=	ग्रथ्यते
श्रन्थ्	+	यक्	+	ते	=	श्रथ्यते	कुन्थ्	+	यक्	+	ते	=	कुथ्यते
उन्द्	+	यक्	+	ते	=	उद्यते	बुन्द्	+	यक्	+	ते	=	बुद्यते
स्यन्द्	+	यक्	+	ते	=	उद्यते	स्कन्द्	+	यक्	+	ते	=	स्कद्यते
इन्ध्	+	यक्	+	ते	=	इध्यते	शुन्ध्	+	यक्	+	ते	=	शुध्यते

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

बन्ध् +	यक्	+ ते	=	बध्यते	तुम्प्	+ यक्	+ ते	=	तुप्यते
त्रुम्प् +	यक्	+ ते	=	त्रुप्यते	तुम्फ्	+ यक्	+ ते	=	तुफ्यते
ऋम्फ् +	यक्	+ ते	=	ऋफ्यते	त्रुम्फ्	+ यक्	+ ते	=	त्रुफ्यते
तृम्फ् +	यक्	+ ते	=	तृफ्यते	दृम्फ्	+ यक्	+ ते	=	दृफ्यते
गुम्फ् +	यक्	+ ते	=	गुफ्यते	उम्भ्	+ यक्	+ ते	=	उभ्यते
दम्भ् +	यक्	+ ते	=	दभ्यते	शुम्भ्	+ यक्	+ ते	=	शुभ्यते
सृम्भ् +	यक्	+ ते	=	सृभ्यते	स्रम्भ्	+ यक्	+ ते	=	स्रभ्यते
श्रम्भ् +	यक्	+ ते	=	श्रभ्यते	दंश्	+ यक्	+ ते	=	दश्यते
भ्रंश् +	यक्	+ ते	=	भ्रश्यते	स्रंस्	+ यक्	+ ते	=	स्रस्यते
भ्रंस् +	यक्	+ ते	=	भ्रस्यते	ध्वंस्	+ यक्	+ ते	=	ध्वस्यते
शंस् +	यक्	+ ते	=	शस्यते	तृंह्	+ यक्	+ ते	=	तृह्यते

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.